श्री रमाहृदय स्तोत्रं

श्रीः पद्मा कमला मुकुंदमहिषी लक्ष्मीस्त्रिलोकेश्वरी
मा क्षीराब्धिसुता विरिंचिजननी विद्या सरोजासना ।
सर्वाभीष्टफलप्रदेति सततं नामानि ये द्वादश,
प्रातः शुद्धतराः पठंत्यभिमतान् सर्वान् लभंते शुभान् ॥

नामावलिः

ॐ श्री श्रियै नमः ।
ॐ श्रीपद्मायै नमः ।
ॐ श्रीकमलायै नमः ।
ॐ श्रीमुकुंदमहिष्यै नमः ।
ॐ श्रीलक्ष्म्यै नमः ।
ॐ श्रीत्रिलोकेश्वर्यै नमः ।
ॐ श्रीमायै नमः ।
ॐ श्रीक्षीराब्धिसुतायै नमः ।
ॐ श्रीविरिंचिजनन्यै नमः ।
ॐ श्रीविद्यायै नमः ।
ॐ श्रीसरोजासनायै नमः ।
ॐ श्रीसर्वाभीष्टफलप्रदायै नमः ।

इति रमाहृदय स्तोत्रं संपूर्णं ।